| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| त्वष्टादिस्तेयम्। आदिना कार्द्दमचैलचर्म्मामिषेक्षुतक्रमूलपुष्पवैदलसूत्रगन्धानां ग्रहणम्। वैदलं वेणुघटितभाण्डम्। गन्धः कस्तूर्य्यादिः। अत्रापवादः। अस्तेयमयये काष्ठमस्तेयञ्च तृणं गवे। | चिरात्रोपवासः। त्वष्टादीनां हरणे मासैकव्रतम्। मासार्द्धं व्रतञ्च। शङ्खमुनिना यदुक्तं तत् कालदेशापहर्तृस्वामिगुणदौर्गत्याभ्यासानभ्यासकामाकामापेक्षया उत्कृष्टापकृष्टद्रव्यापहारे च वेदितव्यम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| जीविकाहरणम्। | यस्य यस्य वर्णस्य वृत्तिच्छेदः तत्तद्वर्णवधोक्तं प्रायश्चित्तं कर्त्तव्यम्। | | | |
| | अल्पवृत्त्यपहारे चान्द्रायणम्। अत्र चोत्तमाधमत्वे प्रयोजकादिकं सकृदभ्यासौ ज्ञानाज्ञाने च संवीक्ष्य वधोक्तपादार्द्धादिव्यवस्थोहनीया। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| देवद्विजद्रव्यापहरणम्। | संवत्सरमप्सु मज्जनं अघमर्षणावर्त्तनञ्च। यच्चात्र गुरुप्रायश्चित्तं मुन्यन्तरोक्तं तदत्यन्ताभ्यास उत्तमसम्बन्धादपेक्षया सम्बन्धम्। इति स्तेयप्रायश्चित्तम्॥*॥ | | | |
| अथ अगम्यागमनम्। तत्र सवर्णासु अस्वजनस्त्रीगमनम्। तत्र ब्राह्मणस्य श्रोत्रियभार्य्यागमनम्। | सकृद्गमने त्रैवार्षिकव्रतम्। द्वितीये षाड्वार्षिकं तृतीये नववार्षिकं चतुर्थे संपूर्णं द्वादशवार्षिकम्। | ४५ धेनवः। | १३५ कार्षापणाः। | २५ गावः। अशक्तौ २५ कार्षापणाः। |
| | अश्रोत्रियनिर्गुणभार्य्यागमने द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। | ३० धेनवः। | ९० कार्षापणाः। | १७ गावः। अशक्तौ १६॥≠१३ कार्षापणाः। |
| क्षत्त्रियस्य क्षत्त्रियभार्य्यागमनम्। | द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। अभ्यासे द्विगुणादिकम्। | ३० धेनवः। | ९० कार्षापणाः। | १७ गावः। अशक्तौ १६॥≠१३ कार्षापणाः। |
| वैश्यस्य वैश्यभार्य्यागमनम्। | वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। | १५ धेनवः। | ४५ कार्षापणाः। | ९ गावः। अशक्तौ ८।≠७ कार्षापणाः। |
| शूद्रस्य पञ्चयज्ञानुष्ठायिन्यायवृत्तशूद्रभार्य्यागमनम्। | वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। | १५ धेनवः। | ४५ कार्षापणाः। | ९ गावः। अशक्तौ ८।≠७ कार्षापणाः। |
| शूद्रस्यान्यशूद्रागमनम्। | षाण्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। | ८ धेनवः। | २२॥० कार्षापणाः। | ५ गावः। अशक्तौ ४≠१३॥ कार्षापणाः। |
| ब्राह्मणस्य क्षत्त्रियागमनम्। | सार्द्धवार्षिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्। | २३ धेनवः। | ६७॥० कार्षापणाः। | १३ गावः। अशक्तौ १२॥० कार्षापणाः। |
| ब्राह्मणस्य वैश्यागमनं विशिष्टशूद्रागमनञ्च। | षाण्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्। | ८ धेनवः। | २२॥० कार्षापणाः। | ५ गावः। अशक्तौ ४≠१३॥ कार्षापणाः। |
| ब्राह्मणस्याधमशूद्रागमनम्। | सार्द्धमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्। | २ धेनू। | ५॥≠० कार्षापणाः। | १ गौः। अशक्तौ १ कार्षापणः। |
| क्षत्त्रियस्य वैश्यभार्य्यागमनं सच्छूद्रागमनञ्च। | नवमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्। | १२ धेनवः। | ३३॥० कार्षापणाः। | ७ गावः। अशक्तौ ६।० कार्षापणाः। |
| क्षत्त्रियस्याधमशूद्रागमनम्। | त्रैमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्। | ४ धेनवः। | ११।० कार्षापणाः। | २ गावौ। अशक्तौ २ कार्षापणौ। |
| वैश्यस्य सच्छूद्रागमनम्। | वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। | १५ धेनवः। | ४५ कार्षापणाः। | ९ गावः। अशक्तौ ८।≠७ कार्षापणाः। |
| वैश्यस्याधमशूद्रागमनम्। | सार्द्धचातुर्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। | ६ धेनवः। | १६॥≠० कार्षापणाः। | ३ गावः। अशक्तौ ३≠१ कार्षापणाः। |
| अथ प्रतिलोमस्त्रीगमनम्। तत्र शूद्रस्याज्ञानतो ब्राह्मणीगमनम्। | द्वादशवार्षिकव्रतम्। ज्ञानात् गुर्वङ्गनागमनोक्तप्रकारेण मरणम्। | १८० धेनवः। | ५४० कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। |